International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(1): 127-129
© 2023 IJSR
www.anantaajournal.com
Received: 04-11-2022
Accepted: 08-12-2022

**Dr. Priyanka Mohanta**
Guest Faculty (S. Sahitya),
Govt. Sanskrit College,
Baripada, Mayurbhanj, Odisha,
India

**Corresponding Author:**
**Dr. Priyanka Mohanta**
Guest Faculty (S. Sahitya),
Govt. Sanskrit College,
Baripada, Mayurbhanj, Odisha,
India

# श्रीप्रफुल्लमिश्रकृतचित्राङ्गदाकाव्ये अलंकारतत्त्वपरिशीलनम्

## Dr. Priyanka Mohanta

**सारांश**
काव्यशास्त्रकलाविलासपरम्परायां साहित्यवाङ्मये रसरीतिध्वनिगुणवत् अलंकाराणां महत्त्वं सर्वैरालंकारिकैरङ्गीकृतम्। कविप्रवरश्रीप्रफुल्लमिश्रमुपनिवद्धकाव्येषु रसालंकारछन्दसां मधुरिमा भृशमालोक्यते आस्वाद्यते च। अलंकारा: वै काव्यस्य सौन्दर्य्यं महत्त्वं च परिप्रकटयन्ति। अलंकार: द्विविध: प्रतिभाति। शब्दालंकारे शब्दानां चारुता दृश्यते। अर्थालंकारे अर्थस्य महत्त्वम् अवलोक्यते। अस्यां चित्राङ्गदायां कवि: श्रीमिश्रमहोदय: द्वयो: शब्दार्थालंकारयो: प्रयोगं सुचारुरूपेण कृतवान्। तत् विरचित चित्राङ्गदा काव्यत: कतिपय अलंकारा: लक्षणसहितं उदाहरणानि मया प्रबन्धेऽस्मिन् सम्भूषितानि सन्ति।

**कूटशब्दा:-** साहित्यम्, काव्यम्, अलंकार:

## प्रस्तावना
### अलंकाराणां सन्निवेश:
### १- अनुप्रास:
तत्रैव अनुप्रास: भवति यत्र स्वरस्य वैषम्येऽपि पुन: पुन: शब्दसाम्यं विद्यते। अत: कविश्रीमिश्रमहोदय: शब्दालंकारं प्रयुज्य काव्यस्य चारूतां मण्डयति। षष्ठे श्लोके अनुप्रास: द्योत्यते एवं यथा-

राजमार्ग: कोलाहलै: कलकलैरान्दोलित: ।
गृहे गोपन्ति ह्यङ्गानाश्च तुष्णीं भूय सज्जना: ।। (चित्राङ्गदा-१/४)

इत्यस्मिन् श्लोके अनुप्रास: द्योत्यते इति वक्तुमपि युज्यते। तथा हि अत्र कोलाहलै: कलकलै; इत्यनयो: शब्दयो: मध्ये स्वरस्य वैषम्येऽपि व्यञ्जनवर्णानां पुन: पुन: आवृत्ति: जाता। अपि च पञ्चमश्लोकेऽपि अनुप्रासालंकार: प्रतीयते यथा-

प्रजाकूले व्याकुले राजा वदति भो चित्राङ्गदे! शृणु मम वचनम् ।
याहि शीघ्रं वत्स! त्वरया याहि पाहि प्रजाकुलं सपदि पाहि ।। (चित्राङ्गदा -१/५)

अत्रापि पकारस्य हकारस्य यकारस्य च पुन: पुन: प्रयोगहेतो: अनुप्रास: प्रतीयते। द्वितीयदृश्यस्य द्वितीयश्लोकेऽपि अनुप्रास: प्रतिभाति। प्रकृत्या श्रीमिश्रमहोदय: सुष्ठुतया अनुप्रासं प्रयुक्त:।तृतीय दृश्यस्य द्वितीये श्लोकेऽपि अनुप्रास: एवं प्रतीयते यथा-

खेलति चपला वधू वधू-खेलां हसति लसति विलासविलोला ।
पितु: निरीक्षणे क्रोध: वर्द्धते त्रस्ता विस्मरति ललिता-लीलाम् ।।( चित्राङ्गदा -३/२)

इत्यस्मिन् श्लोके "वधू वधू" इति पदद्वयस्य तथा "हसति लसति" इति पदद्वयस्य अन्ते ल इति वर्णस्य पुन: पुन: प्रयोगहेतो: अनुप्रासालंकार: लक्षणानुसारं अस्तीति वक्तुं युज्यते। पञ्चमे दृश्येऽपि वहुकथनेन अलम्। अनेन प्रकारेण कवि: चित्राङ्गदायां अनुप्रासालंकारं प्रयोगं कृत्वा शब्दालंकाराणां चारुतां वर्द्धापयति।

**२- यमक:**

कवि: श्रीमिश्रमहोदय: यमकालंकारप्रयोगेऽपि निपुण: अवलोक्यते। यस्य लक्षणम् एवं यथा-

सत्यर्थे पृथगर्थाया: स्वरव्यञ्जनसंहते: ।
क्रमेण तेनैवावृत्ति: यमकं विनिगद्यते ।।

अर्थात् यत्र स्वरव्यञ्जनसंहते: अर्थे सति किम्वा पृथगर्थाया: क्रमेण आवृत्ति: विद्यते तत्रैव यमकं विनिगद्यते। प्रथमदृश्यस्य तृतीये श्लोकेऽपि यमकालंकारं प्रयुक्त: एवं यथा-

धडक धडक धावति चन्द्र-धवलवर्णक:।
पूर्वप्रभया भासते उच्चै: श्रवा किमागत: ।। (चित्राङ्गदा-१/३)

इत्यस्मिन् श्लोके स्वरव्यञ्जनानां क्रमेण आवृत्ति: जाता। अत: यमकालंकार: प्रतिभाति। एवं अन्यत्रापि यमकं परिलक्ष्यते ।

**३- उपमालंकार:**

काव्यं सदैव शरीरेण सह तुलनीयम्। शरीरस्य शोभार्थं लोका: अलंकारान् व्यवहरन्ति। तथैवापि काव्यस्य सौन्दर्यार्थं कवय: अलंकारान् व्यवहरन्ति। तदर्थमुक्तं वामनेन सौन्दर्यमलंकार: इति। अयमेवालंकार: शब्दार्थोभयभेदेन त्रिविध:। तत्र अर्थालंकारस्य प्राधान्यं समधिकमस्ति। तेषु अर्थालंकारेषु मातृरूपिणी उपमा नितरां श्रेष्ठा भवति ।

उपमालंकार: अर्थालंकारेषु आद्य: एव। यस्य लक्षणम् एवं -यस्यां रचनायां उपमान-उपमेययो: साम्यप्रतीति: तथा इवादिबाचकशब्दा: भवेयु: तत्रैव उपमालंकार: प्रतिभाति इति आलंकारिकाणां मतम् एव। कवि: श्रीमिश्रमहोदयोऽपि चित्राङ्गदायां उपमालंकारस्य प्रयोगं सात्यन्तं कृत: इति तत्र अवलोक्यते पूर्वरङ्गस्य चतुर्थे श्लोके एवं यथा-

गाव: पय: प्रस्रवन्ति नभसि वर्षणं यथा ।
तस्मिन् पुण्ये सुखे शान्ते अश्वघाटि प्रकम्पिता ।। (पूर्वरङ्ग:-४)

इत्यत्र द्योत्यते यथा नभसि वर्षणं तथा गाव: पय: प्रस्रवन्ति। यथा इति उपमावाचक: शब्द:। उपमान-उपमेययो: साम्यप्रतीति: द्योत्यते। अतो हि नूनम् उपमालंकार: प्रतीयते। एवम् अन्यत्रापि उपमा कविना प्रयुक्ता ।

**४- परिकर:**

“उक्तिर्विशेषणै: साभिप्रायै: परिकरो मत:” इति लक्षणानुसारं यत्र विशेषणपदानि वै साभिप्रायाणि भवन्ति तत्रैव परिकर: इति आलंकारिकाणां मतमेव। अत्रापि श्रीमीश्रमहोदयेन चित्राङ्गदाया: पूर्वरङ्गस्य तृतीये श्लोके परिकरनामाख्यं अलंकारं संयोजियति। यथा-

काले वर्षति पर्जन्य: शस्यश्यामा वनस्पति: ।
ब्राह्मणा: क्षोभरहिता: सज्जना: सन्ति निर्भया: ।। (चित्राङ्गदा-१/३)

इत्यस्मिन् श्लोके वनस्पते: विशेषणपदं वै क्षोभरहिता: एवं सज्जनानां विशेषणपदं ननु निर्भया: इति। अत: साभिप्रायाणि विशेषणपदानि प्रयुक्तानि। अत: परिकरालंकार: प्रतीयते। अपि च तृतीयदृश्यस्य तृतीयश्लोकेऽपि परिकरालंकार: प्रतिभाति। एवं यथा-

समर-समर्थनं कर्त्तुं यतते सा कथं क्रीडेते वधू वधू खेलाम् ।
कन्दुलीलां सुकुमारकलां हहा विस्मरति कुमारीवेलाम् ।। (चित्राङ्गदा-१/१)

इत्यस्मिन् श्लोके स्थितानि विशेषणपदानि साभिप्रायाणि प्रतीयन्ते। कन्दुलीलाया: विशेषणपदं सुकुमारकला कुमारीवेला चेति।

**५- अतिशयोक्ति:**

कवि: श्रीमिश्रमहोदय: अतिशयोक्तिनामाख्यम् अलंकारमपि चित्राङ्गदायां प्रयुक्त:। यस्य लक्षणम् आलंकारिकाणां मतानुसारम् एवं यथा- सिद्धत्वेऽध्यवसायस्यातिशयोक्ति: निगद्यते इति। अर्थात् प्रकृतस्य निगरणेन अप्रकृतस्य अभेदज्ञानं हि अध्यवसाय:। असौ सिद्ध: साध्य: च इति भेदाभ्यां विभक्त:। चित्राङ्गदाया: द्वितीयदृश्यस्य प्रथमे श्लोके एवं दृश्यते यथा-

नवीने वयसि स्फुटितं यौवनं कलयति काल: स्वकीयं कलनम् ।
चित्ते दूरङ्गमवासनापूरुषं मुहु: निलीयते नृपमुखसरसम् ।। (चित्राङ्गदा-२/१)

इत्यस्मिन् श्लोके नवीने वयसि यौवनं स्फुटितम् इति प्रकृतार्थ:। परन्तु प्रकृतस्य निगरणेन अप्रकृतस्य कालस्य स्वकीयं कलनं हि अभेदज्ञानम्। अतो हि अत्र अतिशयोक्ति: द्योत्यते। इत्थं कवि: यथास्थानम् अतिशयोक्ते: प्रयोगं चकार ।

**६- विभावना**

अपि च विभावनाया: प्रयोगं सातिशयं कृत: अवलोक्यते। यस्या: लक्षणविषये आलंकारिका: कथयन्ति एवं यथा- विभावना विना हेतुं कार्योत्पत्ति: यदुच्यते इति। अर्थात् हेतुं विना यत्र कार्य्यस्य उत्पत्ति: तत्रैव विभावना प्रतिभाति। कवि: श्रीमिश्रमहोदयोऽपि चित्राङ्गदाया: द्वितीयदृश्यस्य द्वितीये श्लोके विभावनां प्रयुक्त:। तद्यथा-

हा गतं तद्दिनं दु:खजातकं स्मरति तां कथां हृद्विदारिकाम् ।
पूजनं यजनं विफलं सकलं कुमार कामेन यावद्धि कल्पितम् ।। (चित्राङ्गदा-२/२)

इत्यस्मिन् श्लोके हृद्विदारिकाया: कथाया: स्मरणार्थं कारणं नास्ति तथापि हेतुं विना कार्य्योत्पत्ति: जायते अर्थात् हृद्विदारिकां कथां स्मरति एव। अतो हि अत्र विभावना अलंकार: प्रतीयते। इत्थं कविना सुचारुरूपेण विभावनालंकारं प्रयुक्त: सन् स्वरचनाया: माधुर्य्यं प्रकाशितम् ।

**७- स्वभावोक्ति:**

अपि च चित्राङ्गदायां स्वभावोक्ते: अलंकारस्य प्रयोगं कृत्वा कवि: अलंकारस्य वैशिष्ट्यं तथा स्वकीयां काव्यकलां दर्शयति। तत्रैव स्वभावोक्ति: प्रतीयते यत्र कस्यापि वस्तुन: प्राणिन: वा स्वभाव: वर्ण्यते। अत: लक्षणानुसारं चित्राङ्गदाया: तृतीयदृश्यस्य षष्ठे श्लोके वयं स्वभावोक्तिं पश्याम: एवम्-

अद्यापि यौवनं यदास्तदास्तनागमे लोमानि जातानि गोपनीयाङ्गे ।
रोमाञ्चति यदा परामृशति चक्षुंषी निमिल्यस्वकीयं गात्रम् ।। (चित्राङ्गदा-३/६)

इत्यस्मिन् श्लोके कवि: श्रीमिश्रमहोदय: चित्राङ्गदाया: कन्याया: स्वभावं वर्णितवान् यत्-चित्राङ्गदायां यौवने समासिनायां स्तनद्वयम् उद्गतम्, गोपनीयाङ्गे लोमानि समुद्गतानि। चक्षुंषी निमिल्य स्वकीयं गात्रं परामृशति इति स्वभाव:। इत्थं समागतस्य यौवनस्य स्वभाव: कविना वर्णित:। अतो हि स्वभावोक्ति: अत्र व्यज्यते। अपि च द्वितीयदृश्यस्य द्वितीये श्लोकेऽपि स्वभावोक्ति: अवलोक्यते एवं-

खेलति चपला वधू वधू खेलां हसति लसति विलास विलिला ।

पितुः निरीक्षणे क्रोधः वर्द्धते त्रस्ता विस्मरति ललिता-लीलाम् ।। (चित्राङ्गदा-२/२)

इत्यत्र चपलाचित्राङ्गदा हसति लसति वधूखेलां च खेलति। एवं तु शिशोः स्वभावः। तस्याः वाल्यस्वभावः वर्णनहेतोः स्वभावोक्तिः प्रतिभाति। एवं बहुशः स्वभावोक्तिं प्रयुक्तः ।

**८- विरोधाभासः**

कविः श्रीफुल्लमिश्रमहोदयः चित्राङ्गदाकाव्ये विरोधाभासालंकारविषये सुचारुरूपेण वर्णितवान्। यस्य लक्षणम् आलंकारिकाणां मतानुसारम् एवं यथा-

क्रिया क्रिया- द्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः ।।
विरुद्धमेव भासते विरोधोऽसौ दशाकृतिः ।।

अर्थात् जाति-गुण-क्रिया-द्रव्यैः सह जात्याः, गुण-क्रिया-द्रव्यैः सह गुणस्य, या द्रव्याभ्यां क्रियायाः तथा द्रव्येण सह द्रव्यस्य यदि परस्परविरोधः तत्र विरोधाभासो भवति। श्रीमिश्रमहोदयस्य चित्राङ्गदायां तृतीयदृश्यस्य द्वितीये श्लोके विरोधः एवं प्रतीयते यथा-

खेलति चपला वधू वधू-खेलां हसति लसति विलासविलोला ।
पितुः निरीक्षणे क्रोधः वर्द्धते त्रस्ता विस्मरति ललिता-लीलाम् ।।( चित्राङ्गदा-३/२)

इत्यस्मिन् श्लोके यदा कन्या वधूखेलां खेलति, हसति,लसति, च तदा पितरि आनन्दं समुदेति परं तदा पितुः निरीक्षणे क्रोधः वर्द्धते इति क्रियया सह गुणस्य विरोधः। अपि च तृतीयदृश्यस्य त्रयोदशश्लोकेऽपि विरोधः द्योत्यते एवं तद्यथा-

अवला जीवने सवलायते सा क्षीणायते तनु तरलभावनम् ।
विस्मरति रतिं रासरसनतां लावण्यभावनं तदनुचलनम् ।। (चित्राङ्गदा-३/१३)

इत्यस्मिन् श्लोके प्रतीयते एवं यत्- या च अवला अर्थात् वलरहिता सा कथं वा सवला इति विरोधः। पुनः या सवला कथं सा क्षीणा इत्यपि विरोधः। पुनरपि श्रीमिश्रमहोदयः चित्राङ्गदायाः विरोधः आभासते। इत्थमन्यत्रापि कविः विरोधाभासाख्यमलंकारं संयोज्य स्वकाव्यस्य महत्त्वं प्रकटितवान्।

**उपसंहारः**

महाकाव्य खण्डकाव्यादिषु अलंकारप्रयोगे यथैव भामहविश्वनाथकविराजादयः आलंकारिकाः गौरवमावहति, तथैव प्रफुल्लमिश्रपादाः चित्राङ्गदाकाव्ये अलंकाराणां प्रयोगं कृत्वा सर्वानाधुनिककवीन् अतिक्रामन्ति इति विषयेऽस्मिन् नास्ति काचत् विप्रतिपत्तिः। अस्मिन् काव्ये सर्वत्र राजते वैदर्भी रीतिः। प्रसादगुणोऽपि परिलक्ष्यते। महाकवेः उपमाप्रयोगः भावानां भाषाणाञ्चागाधता विविधता च आधुनिकसंस्कृतसाहित्यजगति विलसति। तेषां काव्यसंपादने सूक्ष्मेक्षिका प्रतिभा कलात्मिका तूलिका च नीरसे सरसतां दुर्बोधेऽपि सुबोधतां प्रकाशयति।

## संदर्भ सूची


१. दासगुप्तः, दि हिष्टोरि अफ् सान्सक्रिट् लिटेरेचर्, कोलकता इउनिवर्सिटि, १९६२।
१. साहित्यदर्पणः, प्रकाशकः -मोतिलाल वनारसीदास,वंगलो रोड् जवाहर् नगर दिल्ली
२. ध्वन्यालोकः, प्रकाशकः - ड.गङ्गासागर राय, चौखम्बा सान्सक्रिट् भवन ।
३. न्राट्यशास्त्र : प्रकाशकः - कृष्णदासअकादमी, चौखम्वाप्रेस,वाराणसा
४. मिश्रः, श्रीप्रफुल्लकुमारः, आधुनिकसंस्कृतसाहित्यम्, उत्कलविश्वविद्यालयः, भुवनेश्वरम्।
५. मिश्रः, श्रीप्रफुल्लकुमारः, कविताभुवनेश्वरी, स्नातकोत्तरसंस्कृतविभागः, उत्कलविश्वविद्यालयः